
॥ शिवोत्कर्षमञ्जरी ॥

॥ श्रीः ॥

॥ शिवोत्कर्षमञ्जरी ॥



या लक्ष्मीस्त्रिजगच्छरण्यचरणा तस्याः पतिर्यच्छरो
यद्देयं निखिलैर्वदान्यनिवहैस्तद्यस्य जीर्णं धनुः ।
या संविच्छ्रुतिषु स्मृता रहसि सा यत्पादसंसेविनी
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अर्चामीति धिया यदेव कुसुमं क्षिप्त्वा जनो मुच्यते
विध्यामीति धिया तदेव विकिरन्भस्मीकृतो मन्मथः ।
इत्याभ्यन्तरवृत्तिमात्ररसिको बाह्यानपेक्षश्च यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यत्केशाग्रविलग्नमम्बु जगतां तीर्थं परं पावनं
यद्वीर्यं भुवि दक्षिणेति विदितं यज्ञेषु सर्वेष्वपि ।
श्वानो यस्य तपस्विनां च जगतां कामप्रदा धेनवः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

वक्त्राब्जेषु पितामहस्य जगतां वक्षःस्थले श्रीपतेः
सर्वाङ्गेषु शतक्रतोरपि दृढानुच्छ्रित्य जैत्रध्वजान् ।
संप्राप्तो मदनोऽपि यस्य निटिलज्योतिःपतंगायितः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥४॥

यदातुं कृतलोभ एव परमं धाम स्वभक्तान्पुरा
काकुत्स्थोऽप्यतिसंदधे सभुवनान्यन्यानि सृष्ट्वा तदा ।
आवेधोमशकं तदेव तृणवद्दत्तेऽविमुक्ते तु यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥५॥

सेतुं यत्र निबध्य यत्र वसुधामुद्धृत्य मग्नां पुरा
विख्यातो मधुसूदनः स जलधिर्यत्स्रोतसा पूरितः ।
सा जाह्नव्यपि यज्जटातनुशिखालम्बाम्बुलेशायिता
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

दातव्यस्त्रिदिवः प्रतिक्षणपरिक्षीणः समस्तैः सुरै-
स्तद्दानाय च ते कियत्कियदिति व्यापारयन्ते जनान् ।
अक्षय्यं पदमप्यमुत्र च सकृद्यत्कीर्तनं साधये-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥७॥

मन्त्रे वा क्वचिदर्थवादशकले दिष्ट्या गृहीते सकृ-
त्स्वे नाम्नि त्रिदशा वहन्ति महतीं कीर्तिं यदीयोक्तिषु ।
श्वानस्ते निगमा यदीयभवनद्वारे चरन्ति स्वतः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यः सांतानिकलोकदस्त्रिजगतां कोदण्डदीक्षागुरुः
सोऽप्याहूयत मर्त्यभावभजनात्कालेन कालेन किम् ।
तादृक्षोऽपि स कस्यचिद्द्विजवटोस्त्राणाय येनाहतः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ ९॥

कस्मैचिद्द्विजबन्धवे कियदपि क्षीरं पुरा नाथते
दत्तो येन दयारसैकवपुषा दुग्धोद एवार्णवः ।
श्रीश्रीवल्लभकल्पपादपसुधाचिन्तामणीभिः समं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

केनास्मानतिशेरते दिविचराः श्रुत्या गृहीता हि ते
किं नास्माञ्श्रुतिराह तानपरधा ब्रूते किमस्मान्स्वकान् ।
सर्वे चेत्पशवो वयं किमितरैः सर्वस्य यो मोचकः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

बाणो यस्य न बाणकर्म सहते चक्रे च यस्यैतयो-
रेकं चक्रकुलप्रतीपमितरच्चक्रानुकूलक्रियम् ।
ज्या तु ज्यां शिरसा बिभर्ति भुवने भूतो न सूतः क्वचि-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

क्रत्वात्मा पुरुषः क्रतुः क्रतुभुजो वक्ता क्रतूनां क्रतो-
राधारः क्रतुकालकल्पनपरौ सर्वेऽप्यमी संहताः ।
यस्यातिक्रमतः सह क्रतुकृता भ्रष्टाश्च नष्टाः क्षणा-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

आरोढुं वरमौपवाह्यमपहर्तुं सुन्दरीः कन्यका
भोक्तुं भोगमुपस्थितं सुखमलंकर्तुं च रत्नैस्तनुम् ।
संनह्यन्त्यमृतान्धसो हि शमिते येनैव हालाहले
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

स्वं वासो दशधा विभज्य वितरन्नेकैकखण्डं पुरा
यश्चक्रे दश पाकशासनहुताशादीन्दिशामीश्वरान् ।
यद्भिक्षाशनभाक्सदा त्रिजगतामन्नं प्रदात्री शिवा
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

स्वच्छन्दं चरतो हि यस्य चरणाङ्गुष्ठाग्रसंपादिता
रेखा दीव्यति हेतिराजपदवीं प्राप्ता जगद्विश्रुता ।
लब्धा दैत्यभिदा तपोभिरुपदीकृत्य स्वमस्यायुधं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

बाणं काश्चन बाणकोणमितरा बाणस्य मूलं परा
यन्तारं कतिचिद्रथाङ्गमितराः शिष्टाः पुनः स्वामिनम् ।
इत्थं संस्तुवते चिरंतनगिरः साक्षात्प्रणम्यापि यं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

प्राचीनेत्यधुनातनीति भुवने वाङ्नाम या यावती
ताः सर्वाः परितः परीत्य चरणे यस्यायतीर्विश्रमम् ।
शृण्वन्नङ्गदतां गतः फणिपतिः शब्दागमं व्याकरो-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

गान्धर्वागमदेशिकौ तनुभृतां यत्कर्णयोः कुण्डले
यत्पादाङ्गदनिर्मितं भुवि महाभाष्यं किल स्त्यायति ।
पुण्यं पापमिति व्यवस्थितिरियं यद्वाहहेषास्वनः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

ध्यात्वा वर्षगणान्बहून्विरचितं यत्नेन यद्वेधसा
यच्छौरिर्बिभरांबभूव बहुधा भूत्वा च मृत्वा स्वयम् ।
तल्लोकत्रयमीषदुल्लसति यच्चक्षुःस्फुलिङ्गे हुतं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

स्वामीति स्वमिति क्षराक्षरतया शब्दार्थभावेन वा
जीवब्रह्मतया जडाजडतया स्त्रीपुंसभावेन वा ।
द्वेधा भिन्नमिदं हि यस्य वपुषः सव्यापसव्ये विदुः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यल्लाभाय पुरा कियद्भिरमरैः सिन्धौ कियद्वाप्तं
लेभे यत्परिपोषणेन कियतीं कीर्तिं रमावल्लभः ।
यच्चूडाकुसुमक्षरन्मधुरसस्रोतःकणः सा सुधा
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यः स्रष्टा जगतां यतोऽयमभवत्तद्यश्च नाभेरभू-
च्छेते यत्र स तच्च यश्चुलुकयांचक्रे सहान्यैः क्षणात् ।
तादृक्षाः शतशः पुराणमुनयो यच्छिष्यवर्गे स्थिताः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

निर्व्यापारदशैव यस्य जगतीनिर्वाहधौरंधरी
मन्दस्मेरमुखाब्जतैव परमो यस्य त्विषां निग्रहः ।
नित्यं यस्य च मौनमेव निखिलं छिन्त्ते सतां संशयं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

दत्ता श्रीरिषवे सिसाधयिषवे वासो गृहीतं सुरैः
सूताय व्ययिता गिरश्च किमितो दातास्म्यहं केवलः ।
इत्यालोच्य दयानिधिः कलयते कैवल्यमेवार्थिनां
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥२५॥

शारीरः पृथिवी रवीन्दुदहना वायुर्वियत्तोयमि-
त्यष्टाभिश्चिदचिद्गणैः परिवृतं विश्वं न तस्येति यः ।
विश्वं विश्वविलक्षणः प्रभविता विश्वस्य विश्वाधिकः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

शब्दग्राममयी यदीयगृहिणी ख्याता यदीयं वपु-
स्त्रैलोक्यं जडचेतनाष्टकमयं यद्वाणगुप्तं जगत् ।
सर्वासां दयितो गिरां सकललोकात्मा च विश्वेश्वरः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यज्जातीयकणाङ्कितानननहिं जीर्णं कमप्यावस-
न्पार्श्वस्थापितपन्नगाशनपतिर्जागर्ति नित्यं हरिः ।
यत्कण्ठाभरणायितस्त्रिजगतीभीमः स हालाहलः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अन्योन्यश्वसिताशनैः फणधरैराविश्य सत्त्वान्बहि-
र्भुञ्जानैः परिचारकैस्तृणगणैरानन्दिना नन्दिना ।
भिक्षान्नोपचितैश्च दारतनयैः पुष्णाति विश्वानि यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

केयूराङ्गदहारकुण्डलकटीसूत्रोपवीतीभव-
द्भोगीन्द्रोद्भटफूत्कृतिव्यतिकरोन्मृष्टाङ्गरागो मुहुः ।
संवर्तोपचितैस्त्रिलोकभसितैर्भूयोपलिप्येत यः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

सर्वश्चेतनवर्ग एष पशुतामस्यानुमेने स्म य-
त्तेषामेष पतिः प्रभुर्नियमने निर्मोचने च स्वतः ।
इत्याम्नायगिरः स्तुवन्ति बहुशः शाखासु सर्वासु यं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यच्छूलं गतसारमित्युपददे चक्रं जिघृक्षुर्हरि-
स्तत्खण्डो निहितस्तु येन दनुजे तेनापि दुर्निग्रहः ।
निर्जेतुं लवणं प्रतीक्ष्य विरहं शक्त्याभवत्सर्वदा
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

नाम्ना मां श्रुतिरग्रहीदिति सुराः ख्यातिं लभन्ते परां
तं वेदाहमिति श्रुतिः कथितवत्युत्सिच्यते माधवः ।
ता यद्दोरिषुधन्वमन्युषु नमोवाकान्वहन्ते शतं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

सर्गश्च प्रतिसंचरश्च जगतां यत्पक्ष्मणी संश्रितौ
शास्त्राणि श्रुतयोऽपि वा यदधरस्पन्दं प्रतीक्ष्यासते ।
बन्धो मोक्ष इति द्वयं तनुभृतां यस्याक्षिकोणे स्थितं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

शक्त्यर्थं विनिवेशयामि परिगृह्णीतेत्युपच्छन्दिताः
संभूयापि वयं तदर्थवहने न स्मः समर्था इति ।
जग्मुः प्रागमराः शरादिविधया यस्य स्वयं शेषतां
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यानब्धौ विनिमज्ज्य मीनवपुषा शौरिश्चिरायावह-
द्यस्योद्धारणमेव कर्म महतां माहात्म्यमुद्घुष्यते ।
यानद्यापि विधिर्बिभर्ति वदनैस्ते यं वहन्त्यागमाः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

जेतुं त्रीणि पुराणि येन सहसारूढे धरित्रीरथे
वेदाश्वेषु च भग्नजानुषु वृषो भूत्वा प्रयास्यन्हरिः ।
वोढुं तेन रथं शशाक विधृतं शेषात्मनापि स्वयं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अम्बा यद्गृहमेधिनी त्रिजगतां शब्दान्तराण्यन्तरा
संत्यज्योपपदं वदन्ति च जना एकं यमेवेश्वरम् ।
मुक्त्वा च प्रतियोगिनं वदति यं नूनं कुमारं श्रुतिः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

विश्वं मुञ्च बधान चेति हि परा शक्तिर्यदाज्ञापिता
ज्ञानेच्छाकृतिशक्तिषु स्वयमिमं विन्यस्य सर्वंभरम् ।
आस्तेऽनुत्तरसारमस्य परमानन्दानुसंधायिनी
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

उन्मीलच्चतुरस्रविंशतिशतद्यर्णात्मना संख्यया
निर्भक्तैर्भुवनैः सनेतृभिरभिव्याप्तं कलापञ्चकम् ।
यत्कोट्यंशपराख्यशक्तिकणिकालेशस्य लेशायितं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यस्यानन्दमहार्णवस्य कणिका या कापि विद्यानिल-
व्याधूता शतधा विभिद्य भुवनं व्याप्ता श्रुतीनां गणैः ।
ब्रह्म त्वं तदसीति वादमुखरैरद्यापि चान्विष्यते
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

श्रेयः संसरतां किमस्ति परमं नामापवर्गार्चना-
दृत्तानामधिको न कश्चन गुणोऽस्त्यस्माद्धियां गोचरः ।
तद्यद्दर्पणसंप्रसादसुलभं नालं यदीयस्तुतौ
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

नष्टे स्थावरजङ्गमे शतधृतौ नष्टे जगत्स्रष्टरि
व्याप्ते दैत्यरिपौ हरेण विहरत्यस्मिन्महेशात्मना ।
अन्तर्भावयितुं स्वयं तमपि यस्येमे गणाः साक्षिणः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

नाशव्याप्यममङ्गलं तदितरं माङ्गल्यमेवं स्थिते
नश्यद्दैवतधारितैरलमलंकारैरभव्यैरिति ।
नित्यैर्भस्मभिरेव भूषयति यः स्वाङ्गं जगन्मङ्गलं
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

गङ्गाम्भःपरिशोषणं स्मरमदोच्छेदो जगद्दाह इ-
त्याद्यं निग्रहवैशसं कलयते कण्ठादुपर्येव यः ।
अन्तः संततमीहते तु शिवमाकीटं जगन्मात्रके
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

अभ्यर्चन्ति यमामनन्ति यमनुध्यायन्ति यं संततं
गीर्वाणाः फणिनो नरा इति किमत्याश्चर्यमाचक्ष्महे ।
यो देवः स्वयमित्यसौ शिवमनुध्यायञ्शिवत्वं गतः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यास्वप्सु द्रुहिणोऽजनिष्ट धरणौ यत्रावतारो हरे-
र्लिल्ये यत्र हुताशने त्रिजगतां माता विदेहात्मजा ।
तद्भूतत्रयमप्यभूदचतुरं यत्तेजसो धारणे
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यद्धर्मानुचिकीर्षया प्रववृते भिक्षाश्रमोऽनुत्तमो
यद्दास्यव्रतलाञ्छनं परमिति ख्याता विभूतिः श्रुतौ ।
यत्सूक्तिश्रवणेच्छया सुकृतिनो मुञ्चन्ति कायामसू-
न्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

यत्सारथ्यपदश्रुतेः शतधृतेरायुः परार्धाधिकं
शौरेर्यं प्रति मार्गणत्वमयतो जागर्ति लक्ष्मीः स्थिरा ।
यत्पादाश्रयिणः फणाधरपतेर्वाचः प्रथन्ते परा-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

पारम्ये निगमागमाः परमसौलभ्ये पिशाचादयो
वाञ्छाधीनपदार्पणे स भगवान्वैयाघ्रपादो मुनिः ।
सर्वागःसहनेऽन्धकश्च दनुजो यस्य स्थिताः साक्षिणः
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

साराः शब्दकुलस्य येन निगमा वाहा इति स्वीकृताः
सारावद्रिषु कार्मुकं गृहमिति द्वौ हेमरूप्यौ हृतौ ।
सारो वारिषु जाह्नवीति विधृता भक्तानुकम्पाच्छला-
त्स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥

भूमिर्भ्राम्यति बुद्ध एव मरुतः प्रत्यग्भ्रमोऽयद्भुतो
भ्राम्यन्त्येव सहाश्रयेण यदि वा ज्योतींषि सर्वाण्यपि ।
आवर्तोऽयमपां भ्रमः परिचिता मूर्तिर्हरस्याष्टमी
या सास्त्यप्पयदीक्षितो जयति सा मूर्तिर्निरस्तभ्रमा ॥

इति श्रीनीलकण्ठदीक्षितविरचिता
शिवोत्कर्षमञ्जरी संपूर्णा ॥

